अगस्त तः अक्टूबरः २०२५ पर्यन्तम्
श्रावणशुक्ल-अष्टमीः तः कार्तिकशुक्ल-नवमी-पर्यन्तम्
(वैक्रमाब्दः-२०८२)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-१३ संयुक्ताङ्कः-१-३

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन–2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अगस्त तः अक्टूबर
२०२५ पर्यन्तम्

वर्षम्-१३-संयुक्ताङ्कः-१-३
(वै.-२०८२)

(श्रावणशुक्ल-अष्टमी-तः
कार्तिकशुक्ल-नवमी-पर्यन्तम्)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः


| क्र.सं. | अनुक्रमणिका | पृष्ठ-संख्या | |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | स्वागत-गीतिका | डॉ. युवराजः भट्टराई | १ |
| ३. | दुःखविदारकरामः | डॉ. देवीसहायपाण्डेयः | ३ |
| ४. | गणनगीतिः (बालकाव्यम्) | डॉ. हर्षदेवमाधवः | ४ |
| ५. | बाउललहरी | डॉ. हर्षदेवमाधवः | ५ |
| ६. | क्षणिका | डॉ. शुकदेव शर्मा | ६ |
| ७. | न्याये सर्वे समानाः (कथा) | अञ्जू बाला | ११ |
| ८. | आम्रस्य पादपः (बाल-कथा) | अञ्जू बाला | १२ |
| ९. | रात्रौ दिवसौ कथम् अभवताम्? | डॉ. हर्षदेवमाधवः | १३ |
| १०. | सुभाषपञ्चकम् | डॉ. श्रीमन्त-चट्टोपाध्यायः | १५ |
| ११. | वैदिकयज्ञविज्ञानम् | श्री शिवदेव आर्यः | १६ |
| १२. | संस्कृत-पत्रकारितायाः ऐतिह्यं दैनिक- | डॉ. विमलेन्दुकुमारः त्रिपाठी | २० |
| १३. | साप्ताहिक ................ | | |
| | वाल्मीकेः सामाजिक-चिन्तनम् | डॉ. शालिनी शुक्ला | २४ |
| १४. | संस्कृतभाषायां किं नास्ति? | डॉ. उदयप्रकाशः झा | २७ |


दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | ₹25 रूप्यकाणि |
| वार्षिकम् | : | ₹250 रूप्यकाणि |

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!**

अद्य एकतः मनुष्यः समुद्रस्य गभीरतामाविष्करोति, अपरतः आकाशस्यूर्ध्वतां मापनार्थं प्रतिदिनं नूतनान् आयामान् स्पृशति, अनन्त-अन्तरिक्षे पदानि स्थापयित्वा नूतनानि रहस्यानि आविष्कर्तुं प्रवर्तमानः वर्तते। परन्तु मनुष्याणां बुद्धिः अथवा विवेकः यः तेषां अन्तःकरणे विराजमानम् वर्तते, तस्य मनोलोकस्य रहस्यः बुद्धिजीविनां वैज्ञानिकानां च कृते अद्यापि दुर्बोधः वर्तते। २५०० वर्षपूर्वं बुद्धशाक्यमुनिः आध्यात्मिकाध्यानद्वारा मनसः सारतत्त्वं साक्षात्कृतवान्। बुद्धशाक्यमुनिः अस्मानाग्रहं कृतवान् यत् वयम् अस्माकं अन्तःकरणे विद्यमानं दीप्तप्रकाशकिरणं ज्ञात्वा अज्ञानं परिहरन्तः सर्वग्राही बुद्धिः संवेदनशीलतां च विकासयामः। यथा मनुष्यस्य शुद्धं हृदयं भावविकारैः क्षुद्रकामैः च मुक्तं परिष्कृतं च भवितुमर्हति, तथा तस्य मनः अज्ञान-बन्धनात् मुक्तमर्हितुं शक्नोति, येन ज्ञानं प्राप्य तस्य मनः प्रबुद्धं भवति तथा चिन्ता, असमर्थता, अवसादित्यादीनां नकारात्मकमानसिकदशाभ्यः दूरं ज्ञानानन्दमार्गं अन्येभ्यः अपि दर्शयितुं शक्नोति।

संस्कृताध्येतध्णां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः त्रयोदशतममवर्षस्य अगस्ततः अक्टूबर २०२५पर्यन्तमम् प्रकाशितः संयुक्तांकः(१३/१-३) सर्मप्यते। संयुक्तांकेऽस्मिन् डॉ. युवराजभट्टराईमहोदयानां, डॉ. देवीसहायपाण्डेयमहोदयानां, डॉ. हर्षदेवमाधवमहोदयानां डॉ. शुकदेव-शर्ममहोदयनां, सुश्रीअंजूबालामहोदयानां, डॉ. श्रीमन्त-चट्टोपाध्यायमहोदयानां, श्रीशिवदेवआर्यमहोदयानां, डॉ. विमलेन्दुकुमारत्रिपाठिमहोदयानां, डॉ. शालिनिशुक्लमहोदयानां तथा च डॉ. उदयप्रकाशझामहोदयानां अनेकाः बालोपयोगी रचनाः विद्यार्थीनां जिज्ञासूपाठकानां कृते प्रकाशिताः, याः अतीवा रोचकाः संस्कृते रुचिवर्धाकाश्च वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलता-भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

निवेदकः

**( शैलेन्द्रकुमारसिंहः )**

सचिवः

शकाब्दः १९४७ (आश्विन-शुक्ल-एकादशी)

पापांकुशाएकादशी

# स्वागत-गीतिका

-डॉ. युवराजः भट्टाराई

प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।

व्यस्ततां भूरिकार्यस्य हित्वा निजां,
चागताः सन्ति पूज्याः मदीयस्थलम्।
श्रीमतां पादयोः शब्दमालां प्रियाम्,
चार्पयामो वयं बालकाः सादरम् ॥१॥

प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।



सेवनं भाति चाभ्यागतानां प्रियम्
श्रीमतां तेऽस्ति नः पुण्यदं दर्शनम्।
सन्निधानेन याताः वयं धन्यताम्,
मानसं जायते नन्दनं नन्दनम् ॥२॥

प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।

दिव्य-सत्कार-वस्तूनि सन्तीह नो,
कुर्महे स्वागतं शब्दपुष्पैः समम्।
व्योम्नि शोभास्ति चन्द्रेण या चानीता,
सैव शोभा भवद्भिः सभायां कृता ॥३॥

प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।

अत्र गोष्ठ्यां भवद्भिः ह्युपस्थीयते,
तत्र सद्भिः निजं दर्शनं दीयते।
दिव्यता भव्यता तेन संवर्धते ।
मानसं बालकानां भृशं मोदते ॥४॥

प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।

निश्छलं भावपूर्णं सतां स्वागतम्,
स्वागतेनामुना ते भवेन् नन्दनम्।
प्राङ्गणेऽस्मिन् शुभे श्रीमतां वन्दनं
तद्भवन्तं च वन्दामहे वन्दनम् ॥५॥



प्रेमभावैः समेषां शुभं स्वागतम्,
कुर्महे ते वयं वाचिकं वन्दनम्।

- २१, प्रथम-तलम्,
वीथि सं.-५, प्रेमविहारः,
नगली डेयरी, नजफगढ़म्,
नवदेहली-११००४३

# दु:खविदारकरामः

-डॉ. देवीसहायपाण्डेयः

(गारी छनदः)

दु:खद्वन्द्वं विदारय सीतापते दु:खद्वन्द्वम्
हे देवप्रवर हृदि करुणां च धर
रिक्तकोशं च भर, दु:खदोषं च दर ।।

**सुखसौख्यं**

सुखसौख्यं प्रसारय सीतापते।
दु:खद्वन्द्वं विदारय सीतापते दु:खद्वन्द्वम् ।।
निज भक्तिं च देहि
दृढ शक्तिं च देहि
अनुरक्तिं च देहि
अभिव्यक्तिं च देहि

**कल्याणं**

कल्याणं च कारय सीतापते।
दु:खद्वन्द्वं विदारय सीतापते दु:खद्वन्द्वम् ।।
अहमस्तव्यस्त:, विवादैर्ग्रस्तः
विषादैस्त्रस्तः, प्रमादैर्ध्वस्तः

**एवं मां**

एवं मां तारय सीतापते।
दु:खद्वन्द्वं विदारय सीतापते दु:खद्वन्द्वम् ।।
न च कोऽपि शृणोति
न च कोऽपि वृणोति
न च कोऽपि चिनोति
खलवृन्दं दुनोति

**खलवृन्दं**

खलवृन्दं तु मारय सीतापते।
दु:खद्वन्द्वं विदारय सीतापते दु:खद्वन्द्वम्।।



-द्वारा श्री मनीषचन्द्रपाण्डेयः
लवकुश नगरम्, रामघाटः, अयोध्या
उत्तर प्रदेश-२४१३३


## गणनगीतिः ( बालकाव्यम् )

-डॉ. हर्षदेवमाधवः

पञ्च मेषाः स्थिताः अत्र, अन्ये दश समागताः ।
पञ्चदश अतः मेषाः, जाताः योगेन बालकाः ॥

सप्त मित्राणि मे सन्ति सप्त मित्राणि ते सखे ।
आवयोः सन्ति मित्राणि योगं कृत्वा चतुर्दश ॥

चत्वारि सन्ति यानानि, गृहे मे पञ्च ते गृहे ।
नव यानानि नौ सन्ति, आवयोः गृहयोः ननु ॥




दश खगाः स्थिताः वृक्षे, डयित्वा यान्ति पञ्च भोः ।
अतः शिष्टाः तरौ पञ्च जानन्तु बालपण्डिताः ॥

शालां गच्छन्ति नित्यं हि बालकाः पञ्चविंशतिः ।
प्रयान्ति क्रीडितुं पञ्च गृहं प्रयान्ति विंशतिः ॥

गणितं सरलं बालाः, ये जानन्ति दिने दिने ।
सर्वे भवन्ति ते नूनं पण्डिताः च यशस्विनः ॥

# बाउललहरी

-डॉ. हर्षदेवमाधवः

## बाउलभक्तस्य वंशी

(१) सन्ति
वंश्यास्सप्त छिद्राणि,
ओष्ठयोः
वंशी स्पृशति
तदा स्मर्यन्ते
स्वच्छिद्राणि।
षड्रिपवो निर्गच्छन्ति
षट्च्छिद्रेभ्यः।
प्रविशन्ति
षट्च्छिद्रेभ्यः -
निरपेक्षता,
समत्वभावः,
सर्वत्र प्रसन्नता,
दुःखेषु दुःखभावः,
सुखेषु निस्पृहता
तदा
सप्तमच्छिद्रेण
हृदयमागच्छति
मनसो मनुष्यः !
अतो वंशीसंङ्गीते
श्रूयते
पदसञ्चारः
परमस्य।



-८, राजतिलक बंगलो,
ममता औषधालयस्य सम्मुखे,
आबादनगरम्, बसस्थानकस्य पार्श्वे,
बोपल, अहमदाबादम्-३८००५८

# क्षणिका

-डॉ. शुकदेवः शर्मा

**१. अः ( विष्णुः )**

शर्वो हरिः त्रिपुरारिः चक्रिन् उपेन्द्रो वा
अः
यः –
अवति रक्षित भरति पालयति वा जगत्सर्वम्।
(√अव्. भ्वा० + ङ)




**२. अः ( बह्वर्थक अव्य० )**

अभाव-सादृश्य-भेद-विरोधादिज्ञापकः
अः
यः –
सूचयति प्रकटयति प्रकाशयति ज्ञापयति वा
अभावादिभावान्।
( अव्+ ङ )

**३. अऋणिन् ( वि. )**

अनृणिन् ऋणमुक्तः अऋणिकः ऋणशोधिन् वा
अऋणिन्
यः–
प्रत्यर्पयति समर्पयति ददाति वा
न्यूनमपि ऋणम्।
(√ऋ. स्वा.प्रेर.+क्त = ऋण+इन्+नञ्)



**४.अंशः ( हिस्सा )**

भागो खण्डः प्रभागो दायो वा
अंशः
यम्–
अंशयन्ति विभजन्ति वण्टयन्ति वण्डयन्ति वा
दायादाः परस्परम्।
(√अंश्. चुरा.+अच्)

**५. अंशुः ( -किरण )**

किरणः प्रभा उद्‌भासः प्रकाशः आलोको वा

अंशुः

यम्-

अंशयति वितरति वण्डयति वा लोकं द्युतिमान्।

(√अंश्. चुरा.+कु.)



**६. अंशुकम् ( रेशमी कपड़ा )**

पट्टं सितांशुकं परिधानं अधोवस्त्रं वा

अंशुकं

यस्य यस्मिन् वा

विद्योतन्ते भासन्ते प्रकाशन्ते विद्यन्ते वा अंशवः सूत्राणि।

(अंशु+क.)



**७. अंशुमत् ( वि. )**

रवि : मिहिरः तमोहरः द्युपतिः पद्मबन्धुर्वा

अंशुमत्

यः-

अंशयति वितरति प्रसारयति अंशवो लोके।

(√अंश्.+चुरा.+कु+मतुप्.)



**८. अंशुलः ( वि. )**

प्रभास्वरो भानुमत् दीप्तिमत् प्रकाशयुतो वा

अंशुलः

यः-

लाति आदत्ते ग्राहयति वा

अंशुं प्रभां प्राणिनः।

(अंशु+√ला.अदा+क.)

**९. ( क ) अंसलः ( वि. )**
बलवत् शक्तिशालिन् हृष्टपुष्टो वा
अंसलः
यः–
अंसापयति अंशापयति वितरति
निजशक्तिमसहायेषु।
(√अंस. चुरा.+अच्+लच्.)



**१०. ( ख ) अंसलः ( वि. )**
व्यायतबाहुः व्यूढस्कन्धिन् बृहत्स्कन्धो वा
अंसलः
यः–
लाति आदत्ते प्राप्नोति धारयति वा अंसयोः
स्कन्धयोर्बलम्।
( अंस्.+√ला.अदा+अच्. )

**११. अंह्रिः ( पैर )**
अङ्घ्रिः चरणः पादो गमनसहायो वा
अंह्रिः
याभ्यां यैर्वा–
अंहन्ते चलन्ति विचरन्ति भ्रमन्ति वा
जीवाः भूतले।
( √अंह्.भ्वा.+ क्रिन्)



**१२. अकम्**
कष्टं दु:खं पीड़ा सुखाभावो वा
अकं
यस्मिन्–
नास्ति न भवति न विद्यते न निवसति वा
किञ्चिदपि कं सुखम्।
( नञ् + क. )

**१३. अकर्मकः ( वि. )**
कर्मशून्यो धातुः अक्रियो वा
अकर्मकः
यस्य–

नास्ति न भवति न विद्यते
किमपि कर्म।
(नञ् +√कृ. तना.+ण्वुल्.)



**१४. अकर्मन् ( वि.-निकम्मा )**
अकर्मण्यः अकर्मकः अकरः कृत्यविमुखो वा
अकर्मन्
यः -
न करोति न विदधाति न सम्पादयति
किञ्चिदपि कार्यम्।
(नञ् +√कृ. तना.+ल्यूट्)



**१५. अकलः ( वि.-परब्रह्म. )**
स्वयम्भूः निराकारो दिव्यः शाश्वतः कलाविहीनो वा
अकलः
यस्य-
नास्ति न विद्यते न दृश्यते
कला अवयवः स्वरूपं वा।
(नञ् + कल (-ला.)



**१६. अकल्का ( वि.-चान्दनी )**
चन्द्रद्युतिः चन्द्रिका ज्योत्स्ना कौमुदी वा
अकल्का
या-
विद्योतते देदीप्यते प्रकाशते भासते
नभसि
निष्कलङ्का ।
(नञ् + कल्क+टाप्, कल्कं= कालिमा
कलङ्को वा.)

**१७. अकाण्ड ( -ण्डे ) जातः ( वि. )**
सद्यः अविलम्बं सहसा अकस्माद् वा जातः
अकाण्ड (-ण्डे) जातः
यः-

जायते उत्पद्यते भवति
अकाण्डे अप्रत्याशितम्।
(अकाण्ड+स. अलुक् वा+√जन्. दिवा.+ क्त)

**१८. अकामः ( वि. )**
निःस्पृहो निरीहो निराकाङ्क्षः अनिच्छुको वा
अकामः
यः-
न कामयते नेहते नाभिलषति
अभिषङ्गं अभिप्रेतं वा किञ्चित्।
(नञ् +√कम्. चुरा.+डिङ्+अम्)



**१९. अकायः ( वि. परमात्मन् )**
अविग्रहः अशरीरिन् अतीन्द्रियः कूटस्थो वा
अकायः
यः-
न चिनोति न सङ्गृह्णाति न धारयते वा
कायं शरीरम्
(नञ् +√ची.स्वा.+ घञ्+धातोः कुलम्)

**२०. अकारणम् ( वि. )**
निष्कारणं निष्प्रयोजनं निराधारं वा
अकारणं यस्मिन्-
न क्रियते न विधीयते न सम्पाद्यते विनैव कारणम्।
(नञ् + √कृ. तना.+ल्युट्+णिच्)

-विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्,
साधु-आश्रमम्,
होशियारपुरम्-१४६०२१

# न्याये सर्वे समाना:

## कथा

-अञ्जू बाला

सा राज्ञी अहिल्याबाई आसीत्। अहिल्याबाई बहु यज्ञादिकं कृत्वा पुत्रं प्राप्तवान् , पुत्रः लघुः आसीत् यदा तस्याः पतिः पानीपतस्य तृतीये युद्धे दिवंगतः जातः। सा भर्त्रा सह सतिं कर्तुम् इच्छति स्म। परन्तु सर्वे अवदन्– 'एतावता याज्ञ-आदीनि कृत्वा पुत्रः प्राप्तः अस्य पुत्रस्य रक्षणार्थं शरीरं मा त्यजतु।' सा स्वीकृतवती। पुत्रस्य च रक्षिका अभवत्। सा अतीव धार्मिका, सद्गुणी च आसीत्। सदैव धर्मानुसारं राज्यं शासति स्म। पुत्रः युवा अभवत्। सः राज्याभिषेकस्य योग्यः अभवत्। तदा सहसा विचित्रघटना अभवत्। राज्ञ्याः दरबारं प्रति लाञ्छनं प्राप्तवती। "हे धर्मात्मा राज्ञी! तव युवा पुत्रेण एतादृशं पापं कृतम्, यस्य कृते यदि कोऽपि नागरिकः एतादृशं पापं करोति– अनैतिकतायाः पापं, यौनदुराचारस्य पापं, यौनानुशासनस्य पापं, तर्हि भवता तस्मै मृत्युदण्डः दत्तः स्यात्।' राज्ञी अन्वेषणं कृतवती। सा दृष्टवती यत् आरोपस्तु सत्यः अस्ति। राज्ञी आज्ञापयत्–'गच्छ, मम एकमात्रं बालकं गृहीत्वा, यस्य राज्याभिषेकः कतिपयेषु दिनेषु भवन् आसीत्, गजपादयोः अधः मर्दयतु।' सम्पूर्ण जनमानसः, मन्त्रिणः रोदितुम् आरब्धाः। राज्ञी उक्तवती– 'न! न्याये न कश्चित् मम परिचितः। सर्वे मम बालकाः सन्ति। सर्वे मम पुत्राः सन्ति। यः न्यायः जनस्य कृते अस्ति, सः एव न्यायः तस्य अपि अस्ति।'

सर्वेषां जनस्य रोदनं कृत्वा अपि सा स्वपुत्रं गजपादयोः अधः मर्दितवती। सा एकमपि अश्रुपातं न कृतवती। जनसमूहः रोदिति स्म।

अंते यदा सः मृतः, शरीरं शान्तम् अभवत्। तदा राज्ञी अवदत्– 'हे जन! मया राज्ञीरूपेण कर्तव्यं कृतम्। इदानीं मया मातुः कर्तव्यं करणीयम्।'

ते राज्ञ्याः वस्त्राणि अपसारितवन्तः। तथा च यथा राज्ञी श्वेतशाटिका धारयित्वा रोदिति स्म, तथैव सर्वाणि दशदिशाः रोदितुम् आरब्धवन्तः। हृदय-विदारकः, करुण-दृश्यः आसीत्। राज्ञी अहिल्याबाई तस्य शरीरं गृहीत्वा स्वहस्तेन दाहः कृतः। तस्याः लघुसमाधिः अद्यापि मध्यप्रदेशस्य महेश्वरस्थाने नर्मदानद्याः तटे अस्ति।

इयं राज्ञी अहल्याबाई आसीत् या गीतासिद्धान्तानुसारं स्वस्य अन्येषां च भेदं न करोति स्म। न्याये सर्वे समानाः।

# आम्रस्य पादपः

**बाल-कथा**

**-अञ्जू बाला**

ग्रीष्मकालः आसीत्। सौरभस्य मातुलः स्वस्य उद्यानात् आम्रस्य टोकरीं प्रेषितवान्। आम्राः अतीव मधुराः आसन्। सौरभं आम्राणि बहु रोचन्ते स्म। सः चिन्तितवान्-अहं मम उद्याने एतादृशानि आम्राबीजानि रोपयिष्यामि।

सः उद्याने एकस्मिन् स्थाने किञ्चित् मृत्तिकां खनितवान्। सः तत्र आम्रबीजं स्थापयति स्म। बीजस्य उपरि मृत्तिकां स्थापयित्वा किञ्चित् जलं प्रोक्षयामास। सः प्रतिदिनं प्रातःकाले तस्य सिञ्चनं करोति स्म। केचन दिवसाः व्यतीताः। आम्रवृक्षः न वर्धितः। सः तस्य सिञ्चनं त्यक्तवान्।

एकस्मिन् दिने लघुवृष्टिः अभवत्। सौरभः भ्रमन् तत्रैव स्थानं प्राप्य पश्यति यत् उद्याने अग्रे एव रक्तपत्रयुक्तः लघुः वनस्पतिः रोपितः आसीत्। सौरभः वनस्पतिं दृष्ट्वा प्रसन्नः अभवत्। "आम्रवृक्ष-वनस्पतिः आगतः, आम्रवृक्ष-वनस्पतिः आगतः" इति उक्त्वा सः धावितवान्। सः स्वस्य अनुजं हस्तेन गृहीत्वा उद्यानं आनयत्। वनस्पतिं दृष्ट्वा अनुजः अपि हर्षेण प्लवति स्म। सौरभः अवदत्, "एतत् पादपं मया रोपितम्, एषः आम्रवृक्षः अस्ति, बहु मिष्ट-फलानि धारयिष्यति।" तौ पितुः समीपं धावितवन्तौ। पिता उक्तवान् किं प्रसङ्गः अद्य त्वं बहु प्रसन्नः असि। प्रिय अनुज अवदत् - "पिता, उद्याने एकः आम्रवृक्षः आगतः, आगामिवर्षे वयं स्ववृक्षात् आम्रं खादिष्यामः" इति। तस्याः वचनं श्रुत्वा पिता हसति स्म। सः प्रेम्णा अवदत्-

"लघुपादपस्य महत्त्वं भविष्यति दीर्घकालपर्यन्तम्। चत्वारि पञ्च वा वर्षाणि यावत् एषः महावृक्षः भविष्यति। तस्य काष्ठं स्थूलं भविष्यति। महानि महानि शाखाः अपि भविष्यन्ति। तदा अस्मिन् आम्रफलानि भविष्यन्ति।"

एतत् श्रुत्वा प्रिय अनुज किञ्चित् विषण्ण अभवत्। किन्तु सौरभः शीघ्रं अवदत् - "कोऽपि दोषः न वयं एतं पादपं यथायोग्यं पालयिष्यामः। कदाचित् वयं तस्य फलं खादिष्यामः।"

**-२०२६, वसुंधरा**
**गाजियाबादम्, उत्तरप्रदेशः**

# रात्रौ दिवसौ कथम् अभवताम् ?

-डॉ. हर्षदेवमाधवः

बहुसहस्रवर्षेभ्यः पूर्वा इयं कथा। तदा पृथ्वी नासीत्। चन्द्रः अपि नासीत्। नक्षत्राणां प्रकाशः अपि नासीत्। केवलम् एकः प्रजापतिः आसीत्। प्रजापतिः बहुकालं यावत् ध्यानम् अकरोत्। अन्ततः एकलः प्रजापतिः श्रान्तः। स अकथयत्, 'कः अपि द्वितीयः अत्र भवेत्?' तदा सहसा एव तस्य समक्षम् एका स्त्री आगच्छत्। सा अवदत्, 'अहं द्वितीया?' प्रजापतिः अपृच्छत्, 'का त्वम् असि?' सा अवदत्- 'अहं माया अथवा शक्तिः।' प्रजापतिः शक्तिं दृष्ट्वा पुनः ध्यानम् अकरोत्। तदा शक्तिः एकला अभवत्। सा श्रान्ता। सा तिस्रः प्रजाः असृजत्। ताः प्रजाः देवाः, मनुष्याः, दानवाः आसन्। तिस्रः प्रजाः स्वर्गे न्यवसन्। किन्तु बहुसमयं यावत् ते सर्वे अशान्ताः अभवन्। ते परस्परं कलहम् अकुर्वन्। अतः प्रजापतेः ध्यानम् अनश्यत्। प्रजापतिः शक्तिम् अपृच्छत्- 'एते के सन्ति?' शक्तिः अवदत् एते देवाः मानवाः-दानवाः च। एताः आवयोः प्रजाः सन्ति।' प्रजापतिः अपृच्छत्, 'एताः प्रजाः परस्परं कलहं कस्मात् कुर्वन्ति?' शक्तिः अवदत्, 'अहं न जानामि, किन्तु ते सर्वे अत्र एकत्र स्थातुं न इच्छन्ति।' प्रजापतिः सूर्यस्य सर्जनं अकरोत्। सः सूर्यात् एकम् अंशं गृहीत्वा पृथिव्याः सर्जनम् अकरोत्। प्रजापतिः देवेभ्यः स्वर्गे निवासम् अददात्। सः मानवेभ्यः पृथिव्यां निवासं अददात्। सः दानवेभ्यः पाताले निवासं अददात्, इत्थं देवाः स्वर्गे न्यवसन्, मानवाः पृथिव्यां न्यवसन्, दानवाः पाताले न्यवसन्। सूर्यः सततं अतपत्। चन्द्रः नासीत्। अतः रात्रिः अपि नासीत्। केवलं सततं सूर्यस्य प्रकाशः, सूर्यस्य आतपः, सूर्यस्य संतापः त्रिषु लोकेषु आसीत्।

पुनः सर्वे श्रान्ताः। ते सर्वे मिलित्वा प्रजापतेः समक्षम् आगच्छन्। प्रजापतिः अपृच्छत्, 'हे बालकाः। यूयं सर्वे मिलित्वा कलहम् अकुरुत। अतः अहं त्रयाणां लोकानां सर्जनम् अकरवम्। अधुना यूयं कस्मात् दुःखिताः?'

देवाः, मानवाः, दानवाः च सर्वे अवदन्, 'पितामह! वयं न जानीमः। वयं किं कुर्मः? वयं कार्यविहिनाः श्रान्ताः।'

प्रजापतिः देवान् अवदत् 'यूयं परमेश्वरस्य आराधनं कुरुत।' देवाः अवदन्, 'यथा भवान् आज्ञापयति।' इति प्रजापत्तिः मनुष्यान् अवदत् 'यूयं यज्ञान् कृत्वा देवान् आराधयत।' मनुष्याः प्रणामं कृत्वा अगच्छन्। प्रजापतिः दानवान् अवदत् 'यूयं तपः कुरुत, अन्यथा यूयं अशान्ताः भूत्वा युद्धं करिष्यथ।' दानवाः अपि प्रणामं कृत्वा अगच्छन्।

पुनरपि कश्चित् कालः अगच्छत्। तदा दिवसाः रात्र्यः वा न आसन्। अतः कियान् समयः व्यतीतः तत् न कोऽपि जानाति। पुनरपि ते सर्वे श्रन्ताः। पुनरपि ते सर्वे प्रजापतेः समक्ष आगच्छन्।

प्रजापतिः अपृच्छत्, 'बालकाः। पुनः यूयं कस्माद् श्रान्ताः, केन कारणेन यूयं दुःखिताः?'

देवाः अवदन्,' पितामह। वयं परमेश्वरस्य आराधनं कृत्वा श्रान्ताः।' मनुष्याः सततं यज्ञं कुर्वन्ति। अतः यज्ञभागं खादित्वा वयं तृप्ताः। तथापि मनुष्याः यज्ञं कुर्वन्ति। वयं किं कुर्मः?' मनुष्याः अवदन्, 'पितामह। वयं सततं यज्ञं कुर्मः। अतः वयं श्रान्ताः।'